# शास्त्री-तृतीयवर्षम्-

# व्याकरणम् -पञ्चमपत्रम्

# शैक्षिकनिष्पत्तिः

शास्त्रितृतीयवर्षे अपि सत्रार्द्धद्वयं भवति। अस्मिन् वर्षे पञ्चमसत्रार्द्धं षष्ठसत्रार्द्धं च निर्धारितम् अस्ति। पञ्चमसत्रार्द्धे पञ्चमपत्ररूपेण वैयाकरणसिद्धान्तकौमुदीग्रन्थस्य नामधातुप्रकरणादारभ्य लकारार्थं यावत् अंशः निर्धारितः अस्ति। एवञ्च षष्ठसत्रार्द्धे पतञ्जलिविरचितस्य महाभाष्यग्रन्थस्य पश्पशाह्निकम् पञ्चमपत्रत्वेन निर्धारितम् अस्ति। अस्य पत्रस्य अध्ययनेन निम्नलिखितानि प्रयोजनानि सिध्यन्ति।

- प्रातिपदिकस्य धातुरूपाणि ज्ञात्वा तेषां प्रयोगः।
- क्यच्-क्यङ्-क्यष-क्विप्-प्रत्ययान्तशब्दानां रूपाणि विज्ञाय तेषां वाक्ये प्रयोगः।
- कण्डवादिगणस्थधातोः रूपाणि विज्ञाय तेषां वाक्ये प्रयोगः।
- आत्मनेपद-परस्मैपदव्यवस्थां विज्ञाय तेषां वाक्ये प्रयोगः।
- भाववाच्य-कर्मवाच्य-कर्मकर्तृ-रूपाणि विज्ञाय तेषां वाक्ये प्रयोगः।
- लकारार्थव्यवस्थां विज्ञाय वाक्ये प्रयोगः।
- शब्दस्वरूप-व्याकरणाध्ययनप्रयोजन-शब्दानुशासनव्यवस्था-व्याकरणस्वरूप-वर्णोपदेशप्रयोजनानां ज्ञानम्।